National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(56): 240-241
© 2024 NJHSR
www.sanskritarticle.com

**धर्मेन्द्र ओझा**
पुराणेतिहासविभागः,
केन्द्रीयविश्वविद्यालयः,
श्रीसदाशिवपरिसर, पुरी

**Correspondence:**
**धर्मेन्द्र ओझा**
पुराणेतिहासविभागः,
केन्द्रीयविश्वविद्यालयः,
श्रीसदाशिवपरिसर, पुरी

# ।। कपिलपुराणे चैतन्यदर्शनस्यावदानम् ।।

**धर्मेन्द्र ओझा**

## प्राक्कथनम्-

भारतीयसंस्कृतेः मूलाधाराः सन्ति वेदाः। एतेषां यथार्थावगतये पुराणानां सरलतया उत्तमशैल्या च रचना जाता। अतः पुराणस्य व्युत्पत्तौ श्रीजीवगोस्वामिना उक्तम्- " पुरणात् पुराणमिति"। अर्थाद्यद्शास्त्रं वेदार्थं पूरयति तद्पुराणम्। संस्कृतवाङ्मये महापुराणानि एव पुराणानि कथ्यन्ते। येषां संख्या अष्टादशेति वयं जानीमः। महापुराणानामिव उपपुराणानां संख्या अपि अष्टादशेति ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डे प्रोक्तम्-

**अष्टादशपुराणानामेवमेवं विदुर्बुधा।**
**एवञ्चोपपुराणनामष्टादश प्रकीर्तिता।।**[1]

इमानि उपपुराणानि प्राचीनभारतीयगौरवचिन्तनस्य विकासे, भारतीयसंस्कृतेः प्रचारे, ऐतिहासिकतत्वस्य प्रकाशे च उपकरणानि सन्ति। अतः एतानि महापुराणवत् प्रामाणिकानि श्रद्धयास्पदानि चाभिमतानि।

## कपिलपुराणम्-

उपपुराणानां गणनायां कपिलपुराणं कुर्मपुराणस्य पूर्वार्द्धे सप्तमपुराणमुक्तमस्ति । पुराणेऽस्मिन् एकविंशत्यध्यायाः वर्तन्ते। अत्र राज्ञा शल्यजिता पुण्यक्षेत्राणां माहात्म्यमवगन्तुं महामुनिः कपिलः पृष्टः। महामुनिः कपिलः महर्षिणा भरद्वाजमुनिमुखेन तत्र नैकेषां पर्वत्रक्षेत्राणां, तीर्थक्षेत्राणां, पूण्यतमवनानां च विशेषमहिमानं वर्णयामासः। किञ्च तेषु पूण्यक्षेत्रेषु बहुभिः पूण्यकीर्तिभिः यथा- ब्रह्मणः पञ्चमतनुरूपिणा इन्द्रद्युम्ना, पुलहपुत्रेण सुकान्तिना, भगवत्श्रीकृष्णपुत्रेण शाम्बेन, राज्ञा मान्धात्रा च विहितं भक्तितत्वं प्रतिपादितमस्ति ।

## चैतन्यदर्शने श्रीचैतन्यः-

विद्यमानेषु विविधेषु शैव-शाक्ता-जैन-वौधादिधर्मेषु चैतन्यमहाप्रभुः वैष्णवधर्मस्य अनुयायी आसीत्। तेन चैतन्यसम्प्रदायस्य प्रतिष्ठा कृता। चैतन्यमहाप्रभोः जीवनस्योपरि रचितेषु ग्रन्थेषु चैतन्यचरितामृतमिति ग्रन्थे १४८६ तमे वर्षे फाल्गुनशुक्लपूर्णिमायां पश्चिमवङ्गस्य नवद्वीपः नदिया वा इति स्थाने महाप्रभुः श्रीचैतन्यदेवः जनिः लेभे। जन्मसमयेऽस्य हरिनामकीर्त्तनं बभुवः। अतः विद्वद्भिः अयं बालकः हरिनाम्नः प्रचारं करिष्यतीति तस्य जन्मकुण्डल्याः गणनां कृत्वा अभाष्यत। अस्य श्रीचैतन्यमहाप्रभोः प्रारम्भिकं नाम विश्वम्वरो आसीत्। पितरौ तन्निमाईः इति आह्वयताम्। किञ्च जन्मात् तस्य गौरवर्णः आसीत्। अतः जनाः तं गौराङ्गः गौरहरिः इति समाह्वयन्ति स्म। सन्यासी-कारणात् तस्य नाम कृष्णचैतन्यः अपि अभवत्।

**चैतन्यदर्शने भक्तिः-**

शास्त्रेषु भगवत्प्राप्त्यर्थं ज्ञान-योग-भक्तिरिति मार्गत्रयमुपदिष्टमस्ति। ज्ञानेन परंब्रह्मणः आभासः जायते। योगेन परमात्मनः अनुभूतिः सम्भवति। किन्तु भक्त्या स्वयं भगवान् भक्ताधिनः भवति। सत्यादि त्रियुगेषु ज्ञानवैराग्यौ मुक्ति साधकौ आस्ताम्। किन्तु कलावस्मिन् भगवत्प्राप्त्यर्थं भक्तिरेव परमसहायिका भवति। यथोक्तं श्रीमद्भागवतमाहात्म्ये -

**सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ**

**कलौतु केवला भक्तिः ब्रह्मसायुज्यकारिणी।।**[2]

**कृष्णभक्तिः-**

महाप्रभुः श्रीचैतन्यस्य भगवतः श्रीकृष्णस्योपरि परमभक्तिः परमप्रितिः, परमशक्तिश्च आसन्। अतः सः स्वजीवने कृष्णभक्ति-माश्रित्य जनानामात्मनश्च मुक्तिसाधनाय पथोन्मोचनञ्चकार। कृष्ण भक्तिः द्विधा विभज्यते। वौधीभक्तिः, रागभक्तिश्चेति। शास्त्रोक्त-विधिना सकामंकृ- ष्णभजनं वैधीभक्तिः इति कथ्यते। कृष्णप्रीत्यर्थं निष्कामप्रेमः अहैतुकीभक्तिः वा रागभक्तिः इति ज्ञायते। वैधिभक्तेः विस्तृतविवेचनं श्रीचैतन्यचरितामृतग्रन्थे कृष्णदासकविराजेन प्रतिपादिता। एतस्याः भक्तेः पञ्चसाधनानि सन्तीति उच्यते यथा- 1- साधुसङ्गः, 2- नामकीर्त्तनम्, 3- भागवतश्रवणम्, 4- मथुरावासः, 5- श्रीमूर्तिसेवनम् इति। रागभक्तिः द्विधा भवति- 1- रागात्मिका, 2- रागानुगा च। व्रजवासीनां भक्तिः रागात्मिका आसीत्। कलौ रागात्मिकाभक्त्यवलम्वनम् असम्भवम्। अतः रागानुगाभक्तिः भक्तितत्वस्य चरमावस्था कलौ इति चैतन्यमते सर्वोपरि वर्तते।

**भक्तस्य गुणाः-**

चैतन्यमतानुसारेण भक्तिमार्गे भक्ताः नम्राः सहिष्णवः च भवेयुः। चैतन्यशिक्षाष्टकस्य तृतीयश्लोके भक्तः तृणाद्धीनः वृक्षादधिकः सहनशीलः च भवेत्।भक्ताः गुरुकृपायाम् एव इष्टप्राप्तिं कर्तुं शक्नुयुः।

**भक्त्याकर्षणम्-**

चैतन्यदेवः यदा स्वपितुः मृत्योऽनन्तरं पिण्डदानं कर्तुं गयाधामंजगाम तत्र तस्य मेलनम् ईश्वरपुरीणा सह जातम्। सः भक्तिभावेन प्रभावितः सन् तस्य शिष्यः संजातः। अनन्तरं तस्य महत्परिवर्त्तनं जातम्, येन सः भगवत्प्रेमपथः पथिकः अभवत्।तदनु सः नवद्वीपस्य शाक्तसम्प्रदायेषु श्रीकृष्णभक्तेः प्रचारप्रसारं चकार। अनन्तरं तस्य भक्तिभावः नवद्विपाद्वहिः प्रसारं लेभे। तदा नित्यानन्दः, अद्वितार्चायः, तथा हरिदासप्रभृतयः भक्तजनाः गौराङ्गेण सहः मिलिताः। गौराङ्गेण तैः सह मिलित्वा कृष्णभक्तेः पावनधारा प्रौह्यत्। गौराङ्गनित्यानन्दयोर्भक्तिसंयोगः कृष्णबलरामयोः संयोग इव आसीत्। अतः जनाः तद्दृष्ट्वा निताईगौरेति जपमकार्षुः।

**कपिलपुराणे भक्तिः-**

चैतन्यदर्शने याभ्यां वैधीरागभक्तिभ्यां कृष्णप्राप्तेः उपायाः कथिताः, कपिलपुराणे ताभ्यां भक्तिभ्यां राजा इन्द्रदयुम्नः श्रीकृष्णनीलतनोः दर्शनप्राप्तेः विचलितः बभुवः। तदा महोदधितः शंखचक्रगदाचिह्न-युक्तं दारु प्राप्य तेनैव भगवतः श्रीजगन्नाथस्य निर्माणं कृत्वा दारुब्रह्मणमवाप्नोत्। सः एव परंब्रह्मः सर्वदुःखापहारकः वर्तते।पुनः पुराणेऽस्मिन् भगवतः श्रीकृष्णस्य पुत्रः शाम्बः श्रीकृष्णस्य शापकारणात् सूर्योपासनां कृत्वा अर्कक्षेत्रे सूर्यकृपया कुष्टरोगात् मुक्तः संजातः ।

राज्ञा मान्धात्रा सर्पिण्याः शापवसात् शृगालयोनिं प्राप्य गुरोः वशिष्ठस्य आशीर्वादेन विरजादेव्याः भक्त्युपासनां कृत्वा अम्बुतीर्थे स्नात्वा च हीनयोनितः मुक्तिं प्राप्तवान्। यथोक्तम्-

**तत्र गत्वा मुनीन्दोऽसौ तीर्थे कल्पाम्बु संज्ञके।**

**स्नापयित्वा प्रयत्नेन ददौ तस्मै स्वकां तनुम्।।**[3]

**उपसंहारः-**

भक्तिः कलौऽस्मिन् परमकल्याणकारिणी। महाप्रभुना चैतन्येन प्रतिपादितया भक्त्या जनाः आत्मनः परमकल्याणं कर्तुमर्हन्ति। तस्य भक्तेः परमाधारः भगवन्नारायणः श्रीकृष्णैवासीत्। तथा च कपिलपुराणे भक्तेः आधाराः दारुब्रह्मजगन्नाथः, सूर्यनारायणः, गङ्गमाता, विरजामाता, पार्वतीपरमेश्वरौ, नैकानि च तीर्थक्षेत्राणि आसन्। अतः वयं सर्वे तस्मिन् भक्तिसमुद्रे स्नानं कृत्वा आत्मनं पवित्री कृत्य ब्रह्मसायुज्यं प्राप्तुं शक्नुमः।

**सन्दर्भग्रन्थसूचिः**

1. कपिलपुराणम्- चौखम्वाविद्याभवनं वारणासी - 2003
2. श्रीचैतन्य चरित्रामृतम् - भक्तिवेदान्तबुक्स्टोर, हरेकृष्णधाम, जुहू वम्बई।
3. श्रीमद्भागवतम् - गीताप्रेस गोरखपुर।
4. ब्रह्मवैवर्तपुराणम् – 5 क्लाइव रो कलकत्ता, 2012

**पदान्तसूचीः -**

[1] ब्र.वै-श्रीकृष्णजन्मखण्ड- 131/22

[2] श्रीभाग.मा.2/2

[3] क.पु-7/53